चरीच्छृपकः-पिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचर्पयतिवत् (554) ज्ञेयानि ।

## (576) "छेद द्वैधीकरणे"

(X-चुरादिः-1934. सक. सेट्. उभ. अदन्तः ।)

छेदकः-दिका, चिच्छेदयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककेतयतिवत् (260) बोध्यानि । [A]प्रच्छेदितम् ।

## (577) "छो छेदने" (IV-दिवादिः-1146. सक. अनि. पर.)

[1]छायकः-यिका, [2]छायकः-यिका, [3]चिच्छासकः-यिका, [4]चाच्छायकः-यिका ;
छाता-त्री, छाययिता-त्री, चिच्छासिता-त्री, चाच्छायिता-त्री ;
[5]छ्यन्-न्ती, छाययन्-न्ती, चिच्छासन्-न्ती ; —
छास्यन्-न्ती-ती, छाययिष्यन्-न्ती-ती, चिच्छासिष्यन्-न्ती-ती ; —
— छाययमानः, छाययिष्यमाणः, — चाच्छायमानः, चाच्छायिष्यमाणः ;
[6]काष्ठच्छाः-काष्ठच्छौ-काष्ठच्छाः ; — —

---

1. 'आदेच उपदेशेऽशिति' (6-1-45) इत्यात्वे, 'आतो युक् चिण्कृतोः' (7-3-33) इति युगागमः । एवं णप्रत्यये, घञि, णमुलि च बोध्यम् ।
2. णौ परतः आत्वे, 'शाच्छासाह्वाव्यावेपां युक्' (7-3-37) इति पुगपवादः युगागमः । एवं ण्यन्ते सर्वत्र ज्ञेयम् ।
3. सनि, 'सन्यङोः' (6-1-9) इति द्वित्वे, 'अभ्यासविकारेषु बाध्यबाधकभावो नास्ति' (परिभाषा-68) इति वचनात् पूर्वं ह्रस्वः । अनन्तरं 'सन्यतः' (7-4-79) इतीत्वे, तुकि, श्चुत्वे **चिच्छासकः** इति रूपम् । एवं सन्नन्ते सर्वत्र प्रक्रिया ज्ञेया ।
4. अत्रापि, अभ्यासविकारेषु बाध्यबाधकभावाभावेन पूर्वमभ्यासह्रस्वे, 'दीर्घोऽकितः' (7-4-83) इति दीर्घे, 'दीर्घात्' (6-1-75) इति तुकि श्चुत्वे **चाच्छायकः** इति रूपम् । एवं यङन्ते सर्वत्र प्रक्रिया बोध्या ।
5. शतरि, आत्वाभावे, 'दिवादिभ्यः—' (3-1-69) इति विकरणप्रत्यये श्यनि, 'ओतः श्यनि' (7-3-71) इति ओकारस्य लोपे रूपम् । स्त्रियाम्, 'शप्श्यनोर्नित्यम्' (7-1-81) इति नित्यं नुम् ।
6. आत्वे, 'क्विप् च' (3-2-76) इति कर्मण्युपपदे क्विपि रूपम् ।

A. 'नित्यं व्ययापितमलो हृदि रूपयंस्तं
**प्रच्छेदित**प्रकृतिरच्छदितस्वरूपम् ।' धा. का. 3. 63.